विषयः - कारुण्यं परमो धर्मः

मम धर्मं कारुण्यं

ऋतु हेमन्तः। प्रभातस्य वेला। शैत्यं संवर्धयन् शीतः वायुः प्रवहति स्म। सर्वेऽपि कम्बलेन आवृत्ताः शय्याम् अवलम्बन्ते स्म। सहसा दूरात् मधुरः परं च शैत्यप्रभावात् प्रकम्पमानः ध्वनिः श्रोत्रमार्गमुपगतः। 'कमनीयानि कुसुमानि, सुगंधीनि पुष्पाणि। क्रीणन्तु गृह्णन्तु इमानि कुसुमानि भवन्तः' इति।

शनैः शनैः सः ध्वनिः मम समीपे एव श्रुतिगोचरः जातः। कम्बलात् बहिः मुखं आनीय गवाक्षेणाहमपश्यम् - काचित् बालिका मम समीपे पुष्पभाजनं वहन्ति स्थितास्तीति। सा च मां दृष्ट्वा - 'प्रभो कमनीयानि इमानि कुसुमानि' इति प्रार्थयत्। 'बालिके! अस्मिन् शीतसमये कथं त्वं गृहात् बहिः शैत्यं सहसे?' इत्यहमपृच्छत्।

सा शनैः शनैः स्वां दुखमयीं कथां अकथयत् - 'प्रभो वयं दरिद्राः । अहं पितृभ्यां भ्रातृभ्यां च सः शय्यायाः पार्श्वे वसामि। मम जीवन दातरौ पितरौ रोगाक्रान्तौ शय्यावलम्बिनौ च जातौ। ज्येष्ठभ्रात पङ्गुः मूकश्च जातः। अनुजश्च बालः एव। द्वौ एव सेवाकर्तारौ सक्षमौ न स्तः। ह्यः रात्रौ वयं न किमपि अभक्षयाम। प्रभाते भोजनाय न किमपि अस्ति गृहे। एतेषां पुष्पाणां विक्रयेण यत् धनं लप्स्यते, तेन पित्रोः भ्रातोः मम च भोजनाय किञ्चित् क्रेतुमिच्छामि। अतः दीनाः वयं कथं कथमपि शैत्यं सहामहे' इति।

अहमचिन्तयत् - 'अहो! दारिद्र्यं किं न कारयति? इयं बालिका कथं शैत्यं सहिष्यते? तस्याः पितरौ भ्रातरौ वा कथं सहिष्यते? तस्याः ज्येष्ठभ्रातरि

अस्याः भक्तिः, अनुजे च भ्रातरी चास्याः स्नेहश्च प्रशंसामर्हतः । एवं विचिन्त्य अहं कुसुमानि सर्वाण्यपि गृहीत्वा तस्मै शतं रूप्यकानि कानिचित् वस्त्राणि च अयच्छत । अहं तामाश्वासयन् अवदत् - गृहाण सर्वमेतत्, गृहं च गच्छ । तव पितरौ भ्रातरौ आत्मानं च आहारेण सन्तोषय । इमानि च वस्त्राणि तव कृते तेन तव पितरौ भ्रातरौ कृते सन्ति । तेन तव पितरौ भ्रातरौ त्वं च शैत्यात् मुक्तः भविष्यथ ।

इयं रूप्यकानि कानिचित् वस्त्राणि च गृहीत्वा कृतज्ञतापूर्णाभ्यां नेत्राभ्यां मां विलोकयन्ती अगच्छत् ।

कारुण्यं परमो धर्मः ......

. ———— .